# Sandhyavalikritam Lakshmi Stotram

# સન્ધ્યાવલીકૃતં લક્ષ્મીસ્તોત્રમ્

## Document Information

Text title : Sandhyavalikritam Lakshmi Stotram

File name : sandhyAvalIkRRitaMlakShmIstotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, lakShmI, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 155/4-20||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# સન્ધ્યાવલીકૃતં લક્ષ્મીસ્તોત્રમ્

(વિન્ધ્યાવલીકૃતં લક્ષ્મીસ્તોત્રમ્)
સ(વિ)ન્ધ્યાવલી પ્રાઞ્જલિસ્તાં નત્વા હૃદિ જગાદ ચ ।
નમો માત્રે મહાલક્ષ્મ્યૈ ત્રાહિ ભક્તં ચ મે પતિમ્ ॥ ૪॥

નમઃ પ્રકૃતિસંજ્ઞાયૈ મૂલાયૈ તે નમો નમઃ ।
સંહર્ત્ર્યૈ બ્રહ્મમાત્રે તે કુક્ષિસૃષ્ટ્યૈ નમો નમઃ ॥ ૫॥

વામના વાપિ દીર્ઘાશ્ચ નારાયણાસ્તુ તે મુખે ।
મહાકાલાદયશ્ચાપિ સન્તિ ગ્રાસાશ્ચ તે નમઃ ॥ ૬॥

સઙ્કર્ષણાસ્તથા રુદ્રા યમાશ્ચૈવ તવાનને ।
દંષ્ટ્રૈકચર્વણાઃ સર્વે મહામાત્રે નમો નમઃ ॥ ૭॥

વાસુદેવસ્તથા ભૂમા નારાયણાશ્ચ પૂરુષાઃ ।
ત્વત્પલ્લતાતાડિતાસ્તે મહાશક્ત્યૈ નમો નમઃ ॥ ૮॥

ત્વત્તો લક્ષ્મીઃ સમુત્પન્ના મહાવિષ્ણુસ્ત્વદઙ્ગજઃ ।
બ્રહ્માણ્ડાનિ ચ તે રોમ્ણિ રક્ષ લક્ષ્મ્યૈ નમો નમઃ ॥ ૯॥

મહાગ્નયસ્તુ તે ગુપ્તે ત્વત્સ્વેદે વાડવાડનલાઃ ।
ભગવન્તશ્ચ તે ગર્ભે ચણ્ડલક્ષ્મ્યૈ નમોઽસ્તુ તે ॥ ૧૦॥

જૃમ્ભે તે પ્રલયાઃ સન્તિ ચણ્ડે કાલઃ પ્રકમ્પતે ।
ચૂર્ણાયન્તે મહાણ્ડાનિ પૃષ્ઠક્રીડે નમોઽસ્તુ તે ॥ ૧૧॥

રક્ષ રક્ષ મહામાયે પતિં મે પરમેશ્વરિ ।
ચણ્ડી તણ્ડી મહામુણ્ડી ઘમણ્ડી ડિણ્ડિકાદિકાઃ ॥ ૧૨॥

કાલીકરાલીપ્રજ્વાલીલિહાલીરક્તિલાદિકાઃ ।
શક્તયસ્તે રક્તલેશઃ પાહિ કાન્તં દ્રુતં કુરુ ॥ ૧૩॥

પાહિ શીઘ્રં ચાન્યથા ત્વાં ગલં નિકૃત્ય પૂજયે ।

યદ્યહં વિધવા સ્યાં ચેત્પૂર્વં ત્વં વિધવા ભવ ॥ ૧૪॥

યદ્યહં રાજ્યશૂન્યાં સ્યાં ત્વં વૈકુણ્ઠં વિના ભવ ।
યદ્યવમાનિતો રાજા સ્યાત્પતિસ્તેઽપ્યમાનિતઃ ॥ ૧૫॥

મદ્યજ્ઞે ચેદ્ભવેદ્વિઘ્નં તવ યજ્ઞે તથાઽસ્તુ વૈ ।
વદત્યેવં ચણ્ડવેગા શ઼ૃણ્વન્ત્યપિ સભાસદઃ ॥ ૧૬॥

મા મેત્યેવં તદા દેવા નિવારયન્તિ તાં સ્ત્રિયમ્ ।
તાવત્તત્રાગતા પત્ની મહાલક્ષ્મીર્મહાપ્રભોઃ ॥ ૧૭॥

સાન્ત્વયિત્વા ચ તાં રાજ્ઞીં પતિતાં ખર્વપાદયોઃ ।
મા મૈવં દેવ ચાત્યન્તં મા ભક્તસ્ય હર પ્રભો ॥ ૧૮॥

વામનશ્ચ તદા પ્રાહ નૈનં વૈ મારયામ્યહમ્ ।
રાજ્યભ્રષ્ટં ચ નૈવાઽહં કરોમ્યેનં સુસેવકમ્ ॥ ૧૯॥

સ(વિ)ન્ધ્યાવલી સદૈવાઽસ્તુ સુસૌભાગ્યવતી પ્રિયે ।
દૈત્યોઽયં દૈત્યરાજ્યં વૈ કરોતુ સુતલે પ્રિયે ॥ ૨૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૫૫-અધ્યાયાન્તર્ગતં
સ(વિ)ન્ધ્યાવલીકૃતં લક્ષ્મીસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૫૫/૪-૨૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 155/4-20..

Proofread by PSA Easwaran

*Sandhyavalikritam Lakshmi Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*